स्वातन्त्र्येण प्राधान्यं पारतन्त्र्येणाप्राधान्यञ्च वदेदित्यर्थः। यथा स्वतन्त्रस्य ज्वरस्य प्राधान्यं ज्वराधीनानां श्वासादीनामप्राधान्यम्। बलं विवृणोति “हेत्वादिकार्त्स्न्यावयवैर्बलाबलविशेषणम्”। अत्रापि व्याधेरित्यनुवर्त्तते हेत्वादीनां हेतुपूर्वरूपरूपाणाम्। कार्त्स्न्येन साकल्येन अवयवैः एकदेशेन व्याधेर्बलाबलयोर्विशेषणम्। विशेषणं बोधः। कालं विवृणोति। “नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथामलम्” नक्तशब्दोऽयं रात्रिवाचकम्। अनेनैतदुक्तं यस्मिन्नक्तादिरंशो यस्य दोषस्य प्रकोप उक्तोऽस्ति सोंऽशस्तस्य दोषजस्य व्याधेः काल इत्यर्थः। नक्तादेरंशेषु वातादिप्रकोप उक्तो वाग्भटेन “ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्द्ध्वसंश्रयाः। वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमादिति” ते वातपित्तकफाः। ऋतुषु वातादिको यथा। “वर्षासु शिशिरे वायुः, पित्तं शरदि ग्रीष्मके। वसन्ते तु कफः कुप्येदेषा प्रकृतिरार्त्तवी। संप्राप्तिर्व्याधीनां ज्ञानाय हेतुः, यथा मिथ्याहारविहारकुपितवातादयामाशयगमनरसदूषणकोष्ठाग्निबहिर्निरसनरूपं ज्वरोत्पत्तिप्रकारं बोधयति। तथा व्याधीनां संख्यादोषांशकल्पना प्राधान्यबलकालांश्च बोधयति।

**स(म्प्रे)म्प्रैष** पु० सम्+प्र+इष–घञ् वा वृद्धिः। १नियोगे २विधौ हेमच०। विधिशब्दे ४९०७ पृ० दृश्यम्।

**सम्प्रोक्षण** न० सम्+प्र+उक्ष–ल्युट्। जलादिसेचनेन संस्कारभेदे अभ्युक्षणशब्दे ३१२पृ० दृश्यम्। [स्कारे पदार्थे।

**सम्प्रोक्षित** त्रि० सम्+प्र+उक्ष–क्त। जलादिसेचनेन कृतसं-

**सम्फाल** पु० सम्+फल–ज्वला० ण। मेषे हेमच०।

**सम्फुल्ल** त्रि० सम+फुल्ल–अच्। विकसिते। सम+फल–क्त अत उत्वम्। सम्फुल्त इति लकारमध्योऽपि तत्रैव।

**सम्ब** गतौ भ्वा०प०स०सेट्। सम्बति असम्बीत् बोपदेशः साम्बः

**सम्ब** सम्बन्धे चु०उभ०सक०सेट्। सम्बयति ते असससम्बत् त।

**सम्ब** न०सम्ब–अच्। १कृष्टक्षेत्रस्य प्रतिलोमकर्षणे २जले जटा०

**सम्बद्ध** त्रि० सम्+बन्ध–क्त। १सम्बन्धिनि। भावे क्त। २सम्यग्बन्धने न०।

**सम्बन्ध** पु० सम्+बन्ध–घञ्। १संयोगादौ २संसर्गे ३सम्बन्धौ अजयः। ४सम्यग्बन्धने ५न्यायां संसर्गभेदे च। स च सम्बन्धस्त्रिविधः “सम्बन्धस्त्रिविधः पुंसां विप्रेन्द्र! जगतीतले। विद्याजो योनिजश्चैव प्रीतिजश्च प्रकीर्त्तितः। मैत्रन्तु प्रीतिजं प्रोक्तं स सम्बन्धः सुदुर्लभः” ब्रह्मवै० ब्रह्मख० १०अ०। संसर्गश्च नानाविधः “शेषे षष्ठी” पा० महाभाष्ये दर्शितस्तत्रावगन्तव्यः। न्यायमते संयोगसमवायादिरुक्तः। सम्यग्बन्धो यतः। ६हिते त्रि०अजयः।

**सम्बर** न० सम्ब–अरन्। १जले अमरः अयं तालव्यादि अजयः। २बौद्धव्रतभेदे मेदि०। ३संयमे त्रि० ४सेतौ हेमच० ५दैत्यभेदे ६मृगभेदे ७मीनभेदे पुंस्त्री० स्त्रियां ङीष्। ८पर्वतभेदे च पु० शब्दर०। ९जैनमते १०जिनमतप्रसिद्धपदार्थभेदे। स च आस्रवनिरोधरूपः गुप्तिसमित्यादिः अर्हत्शब्दे ३८४पृ० तस्योद्देशः ३८५पृ० च तल्लक्षणं दृश्यम्। संवर इत्येव अन्तस्थवमध्यः पाठः तत्रार्थे।

**सम्बरारि** पु० सम्बरस्य दैत्यविशेषस्य अरिः। कामदेवे अमरः

**सम्बरी** स्त्री सम्ब–अरन् ङीप्। १मूषिकपर्ण्याम् अमरः। २शतावर्य्याञ्च तालव्यादिरयमिति भरतः।

**सम्बल** न० सम्ब–कलच् सम्यक् बलं यतो वा। १जले शब्दर० २पाथेये पु० न० अमरः तालव्यादि तत्रार्थे भरतः।

**स(श)म्बाकृत** त्रि०स(श)म्बेन प्रतिलोमेन कृष्टं क्षेत्रं स(श)म्ब+डाच्–कृ–क्त। १अनुलोमकर्षणानन्तरं प्रतिलोमकृष्टे द्विःकृष्टे क्षेत्रादौ अमरः। भावे क्त। २प्रतिलोमकर्षणे न०

**सम्बाध** न० सम्यक् बाधा यत्र। १नरकवर्त्मभये शब्दमा०। सम+बाध–भावे घञ्। २अन्योन्यसंघर्षे पु० ३सङ्कटे ४भगे मेदि०।

**सम्बाधन** पु० सम्+बाध–ल्यु करणे ल्युट् वा। १द्वारपाले २शूलाग्रे ३मदनद्वारे भगे च मेदि०। भावे ल्युट्। ४सम्यक्पीडने। [त्रि०।

**सम्बुद्ध** पु० प्रा०स०। १बुद्धावतारे त्रिका०। २सम्यग्बोधान्विते

**सम्बुद्धि** स्त्री सम्+बुध–क्तिन् सम्यग्बुद्धिर्यत्र वा। १सम्यग्बोधे २सम्बोधनशब्दार्थे च। [अजयः ४सम्यक्ज्ञाने च

**सम्बोध** पु० सम्+बुध–घञ्। १क्षेपे २बोधने मेदि०। ३नाशे

**सम्बोधन** न०सम्+बुध–ल्युट्। १सम्यक्ज्ञाने। बुध–णिच्–युच्। तत्रार्थे स्त्री भरतः। ल्युट्। २सम्यग्ज्ञापने “स्थितस्याभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते” इति व्याकरणोक्ते अन्यत्रासक्तस्याभिमुखीकरणाय अभीष्टक्रियासु विनियोगाय ज्ञापनादिरूपे ३व्यापारभेदे न० “सम्बोधनपदं यच्च तत् क्रियाया विशेषणम्। व्रजानि देवदत्तेत्यादौ निघातोऽत्र तथा सति” हरिः। समानवाक्ये एव निघातस्य (अनुदात्तस्य) विधानात्। व्रजानि देवदत्त इत्यादौ तस्य निघातः। “सम्बोधनान्तं कृत्वोर्थः कारकं प्रथमो मतः। धातुसम्बन्धाधिकारविहितमस्-